(532) " चीवृ आदानसंवरणयोः " (I-भ्वादिः-879. सक. सेट्. उभ.)

चीवकः-विका, चीवकः-विका, चिचीविषकः-षिका, चेचीवकः-विका; इत्यादीनि सर्वाण्यपि रूपाणि कत्थनार्थकभौवादिकचीभतिवत् (530) बोध्यानि। अस्य धातोरुभयपदीत्वेन शतरि चीवन्-न्ती, चीवयन्-न्ती, चिचीविषन्-न्ती; चीविष्यन्-न्ती-ती, चीवयिष्यन्-न्ती-ती, चिचीविषिष्यन्-न्ती-ती; इति रूपाण्यधिकानि। क्विपि, 'च्छ्वोः शूडनुनासिके च' (6-4-19) इत्यूठि, यणादेशे च्यूः-च्युवौ-च्युवः; इति रूपाणि। 'छित्वर—' [द. उ. 8-49] इत्यादिना वरचि प्रत्यये, 'लोपो व्योर्वलि' (6-1-66) इति धातुवकारस्य लोपे, 'नेड् वशि कृति' (7-2-8) इति इण्णिषेधे च **चीवरम्** इति भवति। [A]चीवरम्=मुनीनां वसनम्।

(533) " चुक्क व्यथने " (X-चुरादिः-1596. अक. सेट्. उभ.)

चुक्ककः-क्किका, चुचुक्कयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुट्टयतिवत् (207) बोध्यानि। ल्युटि[B] **चुकनम्**।

(534) " चुच्य अभिषवे " (I-भ्वादिः-513. सक. सेट्. पर.)

**अभिषवः**=अवयवानां शिथिलीकरणम्, सुरायाः सन्धानं वा। स्नानं च। '**शुच्य**' इति धातोः पाठभेदोऽयम्; इति **सिद्धान्तकौमुदी**।

चुच्यकः-च्यिका, चुच्यकः-च्यिका, चुचुच्यिषकः-षिका, [1]चोचुच्यकः-च्यिका; चुच्यिता-त्री, चुच्ययिता-त्री, चुचुच्यिषिता-त्री, [2]चोचुच्यिता-त्री;

---

A. 'प्रवुन्थ्यवेणीजववेनमाना खातान्तिका **चीवरिभि**र्निषादैः।' धा. का. 2. 27.

B. 'दुर्दान्तचक्र पशुपचुक्कनमप्यरौत्सीत् प्रक्षालितक्षितितलातुलवर्षरोधी।' धा. का. 3. 21.

1. अस्माद्धातोर्यङि, 'सन्यङोः' (6-1-9) इति प्रथमैकाचो द्वित्वे, अभ्यासगुणे च सति, यङवयवस्य यकारस्य 'यस्य हलः' (6-4-49) इति लोपे, अकारस्य 'अतो लोपः' (6-4-48) इति लोपे च, **चोचुच्यकः-च्यिका** इति रूपम्।

2. 'यस्य हलः' (6-4-49) इति यकारस्य, 'अतो लोपः' (6-4-48) इत्यकारस्य च लोपे, '**चोचुच्यिता**' इति रूपं भवति। **माधवधातुवृत्तौ** तु 'हलो यमां यमि-' (8-4-64) इति लोपपक्षे, यङो यलोपे, अकारलोपे च,